# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. FIRST SEMESTER EXAMINATION, MARCH 2021**
**FIRST YEAR [BATCH 2020-23]**
**SANSKRIT (GENERAL)**
**Paper : I**

Date : 30/03/2021
Time : 11.00 am - 1.00 pm
Full Marks : 50

1. यथेच्छम् **एकस्य** पद्यस्य वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। [1×6]

क) मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
नर्क्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः।।

ख) प्रलयपयोधिजले धृतवानसि वेदं
विहितवहित्रचरित्रमखेदम्।
केशव धृतमीनशरीर जय जगदीश हरे।।

2. सप्रसङ्गं पद्य**मेकं** व्याख्येयम्। [1×9]

क) यदि हरिस्मरणे सरसं मनो
यदि विलासकलासु कुतूहलम्।
मधुरकोमलकान्तपदावलीं
शृणु तदा जयदेवसरस्वतीम्।।

ख) वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती।
श्रीवासुदेवरतिकेलिकथासमेत-
मेतं करोति जयदेवकविः प्रबन्धम्।।

3. यथेच्छम् **एकस्य** पद्यस्य वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। [1×6]

क) कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु।।

ख) मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः।।

4. सप्रसङ्गं पद्य**मेकं** व्याख्येयम्। [1×9]

क) जातं वंशे भुवनविदिते पुष्करावर्तकानां

जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।

तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं

याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।

ख) धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः

सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।

इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे

कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।।

5. यथेच्छं प्रश्न**द्वयं** व्याख्येयम्। [2×10]

क) कालिदासस्य नाट्यकृतिमवलम्ब्य एकः प्रबन्धो विरचनीयः।

ख) भारतीयसमाजे साहित्ये च रामायणस्य प्रभावः आलोचनीयः।

ग) पञ्चतन्त्रस्य रचयिता कः? हितोपदेशः केन रचितः? तयोः ग्रन्थयोः परिचयः प्रदीयताम्।

घ) भाससमस्याविषये एकः संक्षिप्तः प्रबन्धो लेख्यः।

——————— × ———————